एभिर्विशुरणितं सहस्रप्लसारा इति वचनात्तद्वत्। दृशो यासां तामंतर्मोहनाय महामंत्रः।
अंतःकरणं मोहयित्वा वशीकरणे महांश्चासौ मंत्रश्च महामंत्रः किं तन्महत्त्वं। अन्यो वशीकर
णमंत्रः वशीकरणमोचकोपायैस्तन्मोचनेन वेदयं वंशीध्वनिमंत्र उपायांतरैर्मुक्तो न भवे
दतोयं महामंत्रः। वंशीश्रिनुखाराधिकत्वात् ध्वनिरूपत्वाच्च तस्य महत्त्वं। अन्यो मंत्रश्चावयि
तुमयोग्यश्चान्यश्रवणान्निःफलं भवेत्। यमुद्दिश्य प्रयुज्यते तं वशीकरोति। अयं ध्वनियु
क्तं भगवन्मुखारविंदावलोकनफलं तत्साधकं। तदुक्तं। अक्षण्वतां फलमिदं न परं विदा
मः। वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुबंधकटाक्षमोक्षैरित्येवं फलसाध
कत्वादनंगवर्द्धकत्वात्सर्वभूतमनोहरत्वान्महत्त्वं। समुदायविशेषणमाह॥ कुरंगीदृशां
।सर्वासामपि मोहने मौलिविघूर्णनेन चलन्मंदारकुसुमानां विश्रंसनेन लज्जाकर्षणेन हृष्टि
दर्षणे वंशीध्वनिर्महामंत्र इति भावः। पुनः कीदृशाः। कुरंगीदृशां मनुष्यस्त्रीणां मंतर्मोहना

Gita Govinda
Bhav Prabodhini

दिकरणंकेवलंनकिंतुदेवानामपियथाधिकारेण। दुर्वारदुःखापदंभ्रंशकस्तत्राह। दृप्य
द्दानवदूयमानदिविषद्दुर्वारदुःखापदांभ्रंशः दर्पयुक्तैर्दानवैर्दूयमानानांदुःखितानांदेवा
नांअनिवार्यदुःखविपत्तीनांभ्रंशोयस्मात्सः। पूर्वं यदादानवाद्दक्षाजातातदादेवानांब्रह्मा
दीनांदुःखहाआसंस्तदाभूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः। आक्रांताभूरिभारेण
ब्रह्माणंशरणंययौ। ब्रह्मातदुपधार्याथसहदेवैस्तयासह॥ जगामसत्रिनयनस्तीरं।
क्षीरपयोनिधेः॥ तत्रगत्वाजगन्नाथंदेवदेवंवृषाकपिं। पुरुषंपुरुषसूक्तेनउपतस्थेस
माहितः॥ गिरंसमाधौगगनेसमीरितांनिशम्यवेधास्त्रिदशानुवाचह॥ गांपौरुषींमेशृ
णुतामराःपुनर्विधीयतामाशुतथैवमाचिरं॥ पुरैवपुंसावधृतोधराज्वरोभवद्भिरंशैर्य
दुषूपजन्यतां॥ वसुदेवगृहेसाक्षाद्भगवान्पुरुषःपरः। जनिष्यतइत्यादिवाक्यंश्रुत्वा
देवाःप्रादुर्भूताःसंतोभगवदाविर्भावंप्रतीक्षमाणाआसंस्तदावसुदेवगृहेभगवान्आ

विनिर्गत्यगोकुलेगतस्तदायोगमायावाक्यंश्रुत्वातदाकंसःमंत्रिणःआहूयप्रलंबाद्यास्ता
न्योगमायेरितमुवाचतच्छ्रुत्वातेदैत्याःकंसंप्रत्यूचुः।।अस्यतस्तेशरव्रातैर्हन्यमाना।
दिवौकसःजिजीविषवउत्सृज्यपलायनपरायणाः।।ययुः।।अथश्चतत्षेविनिर्गमेकंसोय
न्मत्वासुरानितियदुभिःसहविरोधंचकार।।अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्यु
६ तः।यदूनांकदनंचक्रेबलीमागधसंश्रयः।तेपीडितानिविविशुःकुरुपंचालकैकया
निसादिदेशेषुपलायितास्थिताः।केचित्तुमनुष्यसंअनाज्ञातयाःपर्युपासते।एवंविधादेव
रूपायादवाःस्वर्गस्थाश्चदेवाःभगवदाविर्भावंविजानंतिस्मतिकदाभगवान्कंसादीन्दैत्या
न्मारयिष्यतीतिप्रतीक्षमाणास्थितास्तदाभगवान्किशोरोभूत्वाव्रजसुंदरीभिः
सहनानाशृंगारादिरसभोगकरणेरवमितारसभोगेमानापनोदार्थंअधरपानादिय
त्नैरपिलयेजातेसर्वचित्तमनोहरत्वादनंगवर्द्धनत्वाद्वंशीध्वानंचकारतच्छ्रुत्वा

न्नगरच्छन्नीलां कृत्वातः परं कंसादीन् घातयिष्यतीति निश्चयं कृत्वा स्थितानां देवानां स्वर्गस्थितानां
यदुरूपाणां च दुःखापदध्वंसो जातस्तत्वाच्च वंशीध्वनेस्तथा विशेषणमिति॥ अत एवोक्तं सवनशस्त
दुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः॥ इत्यादिवाक्यैस्तथात्वमिति भावः॥ तस्मात्कंस
रिपोः वंशीध्वनिर्वः श्रेयांसि वितनोत्विति फक्कं॥ ॥इति श्रीगीतगोविन्दे भावप्रबोधिन्यां विल
क्षलक्ष्मीपतिर्नामाष्टमः सर्गः॥ ॥गाढमानावलोकनाल्लक्ष्मीपतिर्विलक्ष्य विस्मयान्वि
तो जातस्तथा सर्गः॥ गीतेनैकेन सर्गोऽयं नवमः परिकीर्त्यते॥ कलहान्तरितां तस्मिन्नुवाच
राधिकां सखी॥ तत्रादौ तामथ मन्मथखिन्नामिति॥ ॥तामथ मन्मथखिन्नां रतिरसभिन्नां
विषादसंपन्नां॥ अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः सखी॥ १॥ ॥अथैवं वि
धं स्वैरमनुनयविनयादि वदंतमग्रेस्थितं हरिं विलोक्यानंतरं तां राधां नोकायानुन
यविनयादि वदंतमपि प्रियं च स्वविरहेण तावत्कालपर्यंतं त्वं विना दशमावस्थापर्यंतं

रिरभिसरतिमधुपवनेचवहतिकिंअपरंअधिकंसुखंइत्यन्वयः।अस्यायमर्थः।।यंविना।
दशाम्यवस्थापर्यंतमेतावत्कालेदुःखमनुभूतं।किंच।अपरंअधिकंसुखंइत्यन्वयः।अस्या
यमर्थः।।यंविनादशाम्यवस्थापर्यंतमेतावत्कालेदुःखमनुभूतं।किंच।यदनुगमनायनिशि
गहनमपिशीलितं।अहहनिवसामिनगणितवनवेतसास्मरतिमधुसूदनोमामपिनचेत
सेतिएवमुक्तवतीस्थिताधुनाहरिःसकलदुःखहर्तास्मिन्वनेअभिसन्मुखमभिसरत्याग
च्छति।सतिमधुवसंतसंबंधीपवनेवहतिसति।यद्वा।मृदुपवनेपावे।एवंमनोभवानंद
नचंदनानिलप्रसीदरेदक्षिणमुंचवामतां।।क्षणंजगत्प्राणविधायमाधवंपुरोममप्राण
हरोभविष्यतीतिवेदविधन्वन्प्रार्थितत्वाद्वामतांत्यक्त्वामृदुकोमलातिपवनेवहति।सतिम
नसोस्मिन्प्रान्तेवसति।अपरंअधिकसुखंकिंअतोधिकंनकिमपीतिभावः।अन्यदप्याह।
तालफलादपीति।। ।।तालफलादपिगुरुमतिसरसं।किंविफलीकुरुषेकुचकलशं।माधवे॰

Gita Govinda

॥२॥पूर्वंत्वयोक्तं।ममविफलमिदममलरूपमपियौवनं।तदधुनात्वंतावत्कलावदतिसुरसंअति।
सरसंकुचकलशंकिंविफलीकुरुषे॰ तावोक्त्यातदतुच्चत्वादुद्दीपकत्वमुक्तं एवंविधमपि
तत्कुर्वीति।सरसमंतः[illegible]णंतस्मादिदंबाह्याभ्यंतरतःगुरुश्रेष्ठंरसशास्त्रोक्तलक्ष
णयुक्तंसरसंतत्संबंधीरसेनसहवर्त्तमानं॥एवंकुचकलशंकलश्रव्यक्तमधुरंशंसुख
दं।तत्सुखमव्यक्तंप्रकटीकरणायोग्यंत्वत्कृतमरा[illegible]॥कलशंमंगलकंशंमंगलक
लशरूपंआनंददंतत्किमर्थंविफलीकुरुषे॥अविफलंविफलंक्रियतेतद्धिविफलीकरण
मित्यर्थः॥इदंतदर्थमेवाविर्भावितंत्वदुपयुक्तंनभवेत्तदाविफलमेवेतिभावः॥ननुत्वदुप
देशंविनाविफलंकथंभवतीत्यतआह॥ ॥कतिनकथितमिति॥ ॥कतिनकथितमिदमनुप
दमचिरं॥मापरिहरहरिमतिशयरुचिरं॥माधव०॥२॥ ॥यदधुनाकथ्यतेतदिदंमया
कतिनकथितं॥कुरुममवचनंसत्वररचनंपूरयमधुरिपुकाममित्यादिवाक्यैःअनुपदं

प्रतिहतं त्वं चिरं चिरकालोपि न जातः। किं कथितमित्याह॥ मा परिहर हरिमतिशयरुचिरं
शयमाशयमतिक्रम्यते तदतिशयरुचिरं अभिप्रायादतिशयरुचिवर्द्धकं। दर्शनादेवोत्कंठ्या
त्पादकं मनोहरं वा। कदाचित्किमपि वस्तु प्रथममेकांशेन रुचिकरं भवेन्न तु सर्वांशेन न च सर्वदा
कदाचिदुःखदमपि भवति नैमं तथा कीदृशं हरिं। मानसवाचिककायिकभूतवर्त्तमानभवि
ष्यसकलदुःखहर्त्तारं हरिं मा परिहर त्यागं कुरु। एवं विधं मया पूर्वमेव कथितं॥ न कुरु नितं
बिनी गमनबिलंबनमनुसर तं हृदयेशं। हृदयस्य ईशं वा। हृदये शेते तं वा। यस्त्व
या पूर्वमेव प्रार्थितः। किंत्वाजयशयने निवेशितया चिरमुरसि ममैव शयानमिति तं॥ त्वत्तो
गृहागतं अनुसर इयं मधुरिपुकामं यदि नानुसरिष्यसि तदायं मधुरिपुः मधुनः रिपुः।
यत्र मधुपस्य पतितस्य रिपुः लात्वा हत्वा ति यथा पूर्वं अद्भुतरसक्रीडायां नृसिंहावतारे ततः
शांतरसे कल्पवतास्वबालान्मधुरमधुरहीतं तथा भूतापेच कारिष्यतो मधुरिपोः कामा

भिलाषांस्वयमापरिहरहरिमतिशयरुचिरमिदंमयाकैतिनकथितमित्यपिभावःसूचितःएवं
श्रुत्वासर्वांनुभूतंस्मृत्वाश्रुपूर्णनयनाजाताविषादयुक्तातांतथाविलोक्याह॥किमितिविषी।
दसीति॥ ॥किमितिविषीदसिरोदिषिविफला।विहसतियुवतिसभातवसकला॥माध
वेण॥ध्रु॥इत्येवंप्रकारेणग्रहागतेप्रियेत्वंकिंविषीदसि।अत्रागमनाद्विषादकरणमुचि
तमेवाधुनाविषादंकिमर्थंकरोषि।विकलासतिकिंरोदसिइत्येकव्याख्या।यद्वा॥विगताधैर्य
चातुर्यादिकलाएवंविधासतिकिंरोदनंकरोषिएवंविषादकरणेतवयुवतिसभासक
लाविहसति।युवमिश्रणेयुवतीभिरभिन्नभावंप्राप्तात्वयासहएवंविधात्वदीयासभाविशेषे
णहसति।त्वंविफलारोदसिसाधैर्यचातुर्यादिकलाभिःसहवर्तमानासकलासन्त्यत्वा
त्सभातवपहासंकरोति।लड्डकमेवाश्वसितिनसापरिजनहसनेनकिंचिद्बोसान्मुंचती।स्थि
ताधुनाएवंदृष्ट्वाविशेषेणहसतीत्यर्थः॥राधायाश्चकितंविलोकाहसतिस्वैरंसखीमे

Geeta Govinda
Bhava Prabodhini

फलेप्रोक्तत्वात्॥अतोमाविषीदमारोदीरितिभावः॥यद्येयंतवद्युवतिन्दृसतितत्रोपायमा
ह॥ ॥सजलनलिनीति॥ ॥सजलनलिनीदलशीतलशयने॥ ॥हरिमवलोकयसफल·
यनयने।माधवे०॥ ॥५॥ ॥यंविनापूर्वंकिंचित्कालयतत्वकृतार्थंमन्यमानासितदधुनासज
लनलिनीदलेषुकृतशीतल शयने।यावत्त्वंनमिलसितावन्नलिनीदलानिष्ठुक्तानित्वरिषं
तीतिविज्ञायसजलानिनलिनीदलानिकृत्वारचितेनशीतलेनशयनेउपविष्टासतिहरिंअव।
लोकय।यद्वा।उपविष्टंहरिमवलोकनेकिंस्यादित्याह।नयनेसफलय।त्रिभुवननयनोत्स
वावलोकनेननयनेसफलेभवतः।बहीयतेतेननयनेनराणामंगानिविह्योनीनिराद्धृतो।ये
॥किंच।अद्यएवतोफलमिदंनपरंविद्यामइत्याद्युक्तत्वान्नयनेसफलेनविघ्नातःनोचेन्निः
फलइत्यर्थः॥इदमपिश्रुत्वाखिद्यमानांप्रत्याह॥ ॥जनयसिमनसीति॥ ॥जनयसिमन।
सिकिमितिगुरुखेदं।शृणुममवचनमनीहितभेदं॥ ॥माधवे०॥६॥ ॥इत्येवंमनसिगुर्वी।

तिशयखेदंकिंजनयसि।असत्वाऽकर्णितंकिंकरोषि।ममवचनंशृणु।कीदृशं।अनीहि
तभेदं।ननिहितःनआरोपितोभेदोयस्मिंस्तत्।कापट्यरहितं।यद्वा।अनीहितभेदं।य
थास्यात्तथाकलुषतांत्यक्त्वाशृण्वित्यर्थः।। ।।शृणुविमिति।। ।।हरिरुपयातीति।। ।।हरि
:समीपंयात्यागत।बहुमधुरंवंचितंवियुक्तंकिमर्थंकरोषि।हृदयंनुतउत्सुकं।गणयतिगु
णग्रामंप्रियसंगमायदयितस्य।कृष्यमाणंगुणैःहृदयमदयेतस्मिन्निवपुनर्वलितेबला
दितिवाक्येस्तदासक्तंविधुरंअतिविधुरंकिंकरोषि।हृदयंनुतउत्सुकं।गणयतिगुणग्रामं
प्रियसंगमायदयितस्य।कृष्यमाणंगुणैः।हृदयमदयेतस्मिन्निवपुनर्वलितेबलादिति
वाक्येस्तदासक्तंविधुरंअतिविधुरंकिंकरोषि।हृदयानुकूल्यंकुर्विति भावः।कविःप्रार्थ
यतीत्यत्राह।। ।।श्रीजयदेवभणितमतिललितमिति।। ।।श्रीजयदेवभणितमतिललितं।।
सुखयतिरसिकजनंहरिचरितं।। ।।माधवेरण।। ।।८।। ।।इत्येवंविधेअतिललितंलावण्यादि

अथनयविनयप्रणतादियुक्तंहरिचरितं।कःखल्वसौहरिश्चरितंचरगतिश्चागमनरूपंर
सिकजनंप्रति।रसोवैसःइत्युक्तत्वाद्रसोभगवान्तदर्थंभवः।संभवोयस्यतत्रारसिकरसिक·
श्चासौजनश्चरसिकजनः।एवंविधोगोपीरूपस्तदर्थजनमात्रजनः।जनिप्रादुर्भावे।तदर्थं।
प्रादुर्भावात्तदितिरिक्तंदीयमानंनगृह्णातिविनामत्सेवनंजनि·जनः॥एवंविधोवाजनः
भगवत्प्रियारूपस्तत्प्रकारःरसःशृंगारद्विदलात्मकःसंयोगविप्रयोगात्मकस्तद्भोगार्थंभ
गवत्या गद्यात्।शृंगारःसखिमूर्तिमानिवमधौमुग्धोहरिःक्रीडतीतितद्रूपःरसिकोभग।
वान्तस्यजनःपूर्वोक्तप्रियारूपस्तंप्रतित्वंचरितमागमनंसुखयतु।कलहांतरितजनितं
दुःखंनाशयत्वित्यर्थः।यद्वा।पूर्वोक्तरूपोहरिःतत्संबंधीयोरसिकजनो[illegible]जनस्तथा
विधस्तंप्रतिएतच्छ्रवणाद्वलितंयद्धरिचरितंलीलारूपंसुखयत्वितिच।अथैवंकथ्य।
नानापिसखीअथप्रस्तुतत्वरांराधिकांप्रतिसेर्ष्यंवाक्यमाह॥मुग्धेयत्तुरूपासियस्त्रण।

मतिस्तब्धासियद्रागिणिद्वेषस्थासियदुन्मुखेविमुखतांयातासितस्मिन्प्रिये॥ युक्तंतद्विपरी
तकारिणितवश्रीखंडचर्चाविषंशीतांशुस्तपनोहिमंहुतवहः क्रीडामुदोयातना॥१॥ हेविप
रीतकारिणि सर्वविपरीतकारिणितवश्रीखंडचर्चाविषंशीतांशुस्तपनोहिमंहुतवहः क्रीडा
मुदोयातना॥ हेविपरीतकारिणि सर्वंविपरीतंकरोति। इतितस्तथातवेदंसर्वविपरीतं-
भवति।तद्युक्तंतदुचितं। किंतत्श्रीखंडचर्चाविषं। चंदनचर्चानाम्नलिपोवाविषंजायते। शी
तांशुश्चंद्रस्तपनः सूर्यवत्तापजनकः। हिमंकर्पूरंतुषारंवाग्निवद्दाहकं॥ क्रीडामुदजनका
स्तायातनाः॥ एवंसर्वंत्वयिविपरीतंभवतितद्युक्तमेव॥ किंतद्विपरीतंकृतमित्याकांक्षाया
माह॥ स्निग्धेरागयुक्तेप्रियेत्वांहृदयेऽत्राधायतत्पाजव्रजसुंदरीएवंविधेपरुषासियादि
त्यादिनाप्रणमति प्रणतेपिस्तब्धासिकाष्ठवत्तत्रस्थितासि। यद्रागिणिद्वेषस्थासिअनुरक्तेवि
रक्तासि। यदुन्मुखेत्वदवलोकनोत्सुकेविमुखतांयातासि॥ एवंविपरीतकारिणित्वयिविप

रीतंजायतेतद्युक्तमितिभावः॥एवंश्रीराधांप्रतिअनुनयवचनंवदंतंप्रणतमपिश्रीकृष्णं
तस्यमहिमाद्यस्फूर्तियुक्तायास्तस्याःसौभाग्यंद्योतयन्सखीजनःश्रीकृष्णस्यैश्वर्यमाह॥
सांद्रानंदेति॥ ॥सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः।
संदर्शितेंदीवरं॥स्वच्छंदंमकरंदसुंदरगलन्मंकिनीमेदुरंश्रीगोविंदपदारविंदमशुभस्कंदा-
यवंदामहे॥१२॥श्रीगोविंदः यः गोकुलजननाशायोद्यतस्येंद्रस्यमदंनिर्वासमद्रक्षणंकृत्वागोविं-
दाभिधानंप्राप्तवान्।सोधुनास्मदर्थमागतस्यपदारविंदंआगत्यतापनाशकत्वाद्वयं।
सर्वावंदामहे॥किमर्थमशुभस्कंदाय॥तस्यानागमनात्विरहेदशम्यवस्थापर्यंतक्लेशयु-
क्तांश्रीराधांविलोक्यसखीनांमनस्याशुभनिवृत्तिर्जातत्वादशुभस्कंदनान्नमस्करणात्सख्य
स्तद्वंदनंकुर्वंतीतिभावः॥ननुदुर्भानिवंधितकैश्चित्सर्वैर्वंदितमस्तिकेषांवाशुभंदुःख
नाशंकृतमस्तीतिचेत्तत्राह।कीदृशं।सांद्रानंदपुरंदरादिदिविषद्वृंदैरिति।इंद्रसमान

नगंकृतवान्श्रीगोवर्द्धनधृत्वातदैश्वर्यंदृष्ट्वास्वापराधक्षमापनार्थमागत्यभगवत्पा
दपतनात्प्रसन्नेजातेभगवतितेषांसांजातिश्रद्धयानंदस्तुकैःपुरंदरादिमहेंद्रादिभि
र्दिविषद्भिर्देवैर्देवसमूहैस्तेषाममंदातिश्रद्धयादरात्तत्रासमंतात्तन्नम्रैस्तेषांमुकुटेस्थिता
येइंद्रनीलमयस्तैर्मुकुटेंद्रनीलमणिभिःसम्यक्दर्शिताइंद्रनीलमणिरूपादींदिरा
भ्रमराःयस्मिंस्तत्।यत्रारविंदंभवतितत्रभ्रमराअपिभवंति।मकरंदश्चगोविंदपदारविं
दरूपंकमलंतत्रनम्रेंद्रादिमुकुटस्थनीलमणिरूपाभ्रमराश्चमकरंदमाह॥ ॥स्वच्छंदं
मकरंदेति॥ ॥स्वच्छंदमकरंदसुंदरंयथास्यात्तथागलन्मंदाकिन्याकाशगंगयाकुलामेदु
रं।स्निग्धंतद्रूपमकरंदमुक्तं।इदमेकोशामिहगैश्वर्यंदर्शितं।एवंविधमनुनयवदंतमग्रेप्रण
तमपिप्रियंप्रतिपत्तेषामासीत्तिभावः॥ ॥इतिश्रीगीतगोविंदेश्रीजयदेवनामकेकलहांतरिता
वर्णनेभावप्रबोधिन्यांमंदमुकुंदोनामनवमःसर्गः॥ ॥९॥ ॥श्रीराधिकामानोपशम

नचिंतयामंदमुकुंदोयत्रसः॥ ॥सर्गोयंदशमोगीतैनैकेनैवतुवर्ण्यते॥ तत्रराधांहरिःप्राह
स्वचनंचाटुपूर्वकं॥ अत्रांतरेइति॥ ॥अत्रांतरेमसृणरोषवशीदसीमनिःश्वासनिःसहमुखी
समुपेत्यराधां। सव्रीडमीक्षितसखीवदनांतेसानंदगद्गदपदंहरिरित्युवाच॥ ॥२॥ ॥एवमु
क्तप्रकारेणप्रातरारभ्यसायंकालपर्यंतंश्रीराधांप्रतिसखीमानापनोदनंकुर्वतीस्थिताए
तस्मिन्नंतरेहरिःपूर्वसंपूर्णदिवसेप्रतीक्ष्यमाणःस्थितः। सखीमानमपनेष्यतीतितदामा
नमनपगतंज्ञात्वाप्रदोषेरजनीमुखेस्वयंसुमुखीमुपेत्यपूर्वसखीरहः॥ उक्तवतीस्थितात।
दाभगवानदूरेस्थितस्त्रासीत्तदनंतरमेवंज्ञात्वामुपसमीपेगत्वासुमुखीकिंचित्कोपप्रशमने
नसखीवाक्यात्तुष्टुशोननंप्रसन्नंमुखंयस्यास्तांश्रीराधांउपेत्यहरिःसानंदगद्गदपदंयथा
स्यात्तथाइतिवक्ष्यमाणमुवाच॥ सुमुखीत्वादानंदेनसद्गद्गदंअस्पष्टंसकलमेववक्तुमशक्यं
पदंयथास्यात्तथाइतिवक्ष्यमाण वाक्यमुवाचेत्यर्थः॥ ननुसंपूर्णदिवसेस्थित्वाप्रदोषेत॥

मुपेत्यकथमुवाचेत्याकांक्षायामाहाकीदृशींतां।अरुणरोषवशादसीमनिःश्वासनिःसह
मुखीं।अरुणातिगाढरोषवशात्राधेवैंतांसक्तांमुग्धवधूनिकरेविलासखुरुकंहरिंदृष्ट्वात
लोनागमनेमाधवमंतरेणागतांविषादमूकांसखींवीक्ष्यकयापिरमितंविशंकमानातेना
तिगाढरोषवशान्मर्यादायेनिश्वासास्तैर्निःसहसखेदंअलुस्नरकलुषंमुखंयस्यास्तां
एवंविधांज्ञात्वासंप्रतीदिवसंप्रतीक्ष्यतदनंतरंसखींताक्याश्रुमुखीं।पुनःकीदृशीं।सव्री
डमीक्षितसखीवचनांव्रीडयालज्जयासह।सव्रीडंयथास्यात्तथेक्षितंसखीवदनंययातां
।पूर्वंलज्जानस्थितायत्तोयाहिकेशवकितवेत्यादिवाक्यान्युक्तानितवेदंपश्यंत्याइत्यादीनि
पूर्वंक्रोधारुणकोपवशात्भगवन्माहात्म्यास्फूर्त्याव्रीडानस्थिता।ततःसख्युःसांद्रानंदपुरं
दरादिदिविषत्कैरैश्वर्यश्रवणान्माहात्म्यस्फूर्त्यालज्जाजाता।तयासखीवदनेक्षणात॰
किंचिन्मानोपशमनंज्ञात्वादिनांतेहरिस्तवाचेत्यर्थः।किमुवाचेत्याकांक्षायामाह॥ ॥८८

सियदि किंचिदपि दंतरुचिकौमुदी हरति दरतिमिरमतिघोरं। स्फुरदधरसीधवे तव वद
नचंद्रमा रोचयतु लोचनचकोरं॥ प्रिये चारुशीले मुंच मयि मानमनिदानं। सपदि मदनानलो
दहति मम मानसं देहि मुखकमलमधुपानं॥ ॥२॥ ॥हे प्रिये चारुशीले अनिदानं मयि मानं
मुंच। न विद्यते निदानं कारणं यस्मिंस्तत्। ननु कथमनिदानं मुग्धवधूनिकरविलसितो हृष्ट
:। अत्रायमाशयः। तन्निदानं चेत्तदादर्शनानंतरं रासे हरिमिह विहितविलासे॥ स्मरति मनो
ममेति। गुणयति गुणग्रामं भ्रामं भ्रमादपि नेहते। वहति च परितोषं दोषं विमुंचति दूरतः
। सखी। हे केशिमथनमुचितं न सा। तस्मान्न निदानं। तर्ह्येवं तदा मुंच मयि मानमनिदानमिति
हरिरनुरक्तं न वदेत्। किं वा सख्यारण्यं गता सत्यं मेध्यानरणं करोति वंजराडत्याद्दिमाने सति।
करणं न भवेत्॥ त्वरितमुपैति न कथमभिसारमित्यादिक कथनमुचितं न भवेत्। एवं चेत्तदा
गते भगवति कथं मानं कृतं तत्राकारणार्थं गतायाः सख्याः विलंबे जाते हरिरागमने च ततश्च

Geeta Govinda vallabhacharya-agrahara.org Vallabhacharya Bhav Prabodhini

ऽदयेजातेसखीमाधवमंतरेणागतंविषादमूकांवीक्ष्यकयापिरमितंविशंकमानासती
दृष्टवदेवाहकापिमधुरिपुणाविलसतियुवतीरधिकगुणासमुदितमदनेत्यादिकथय
तीस्थितातदाकथमपियामिनींविनीयस्मरशरजर्जरितापिसाप्रभातेत्रनुनयविनयव
दंतमयेऽपराद्धममपिप्रियंसान्यस्त्वयमाह॥तामनुसरसरसीरुहलोचनयातवहरतिवि
षादमित्यादिकथनंमुग्धवधूनिकरेविलासदर्शनात्तामविश्वसदातामनुसरेत्युक्तंस्यादत
स्तेनान्यत्ररमणेविशंकमानासतीतामनुसरेत्युक्तांतदुक्तंतत्वाद्भगवतोक्तं।मुंचमयि
मानमनिदानमितिभावः॥कथमनिदानमात्पस्कामुग्धवधूनिकरेक्रीडितःकिंनदृष्टइ
तिचेत्तदात्वंप्रियातासांनासियाप्रियाभवतिसाप्रियस्यप्रियंयथाभवतितथाकरो
तित्वंप्रियासिचेन्मयापित्वयिप्रियंक्रियते।त्वयिप्रियोऽनुरक्तोरसस्तत्राप्यज्ञानार्थंता
भिःसहक्रीडितंनोचेत्ततःसाकूतस्मितमित्यादियुक्तं।गोपीनांनिह्नुतंनिरास्पग

मिताकांक्षः कृतोज्ञातः। ततोनम्रीं तयनस्तत्सामाममनलज्ज्यमानः सख्यां हृदयेऽवधाय
व्रजसुंदरीणां त्यागः कृतस्तत्फलकर्षः प्रकटीकृतस्तस्य त्वं प्रियात्वयापि मत्प्रियं कार्यं चारु
शीला च। चारुशीलमाचरणं यस्याः सा तथा विधेया। चारुशीलासस्यात्सान्नम्रचारुशीलं चा
रुशीलं यश्यतितत्तोऽनिदानं मयि मानं मुंच। माने कृते का हानिरित्यत आह। सपदि मदनानल
हति। यदि त्वं मानं यस्मिन् कृते करोषि सपदि तत्क्षणे तन्मानसमकालमेव मदनानलः म
म मानसं दहति। बाह्यशरीरदाहे तु मनोपायाश्चंदनादयो बहवः संति मानसदाहशाम
क एतदतिरिक्तमनोपायोऽस्तीति स एवाह॥ देहि मुखकमलमधुपानमिति॥ यथान्याग्नि
नादग्धो मधुना शांतिं न वेत्तथा मम मानसीकामाग्निनादग्धं तव मुखकमलमधुपानाच्छो
तोऽनवेदतो मुखकमलमधु पानं। ननु मधुपानादाहशांतो न वेत्तदान्यानि मधूनि बहूनि सं
ति। तान्यादाय कथं न पिबसि तत्राह॥ मुखकमलमधीति॥ लौकिकाग्निनादाहस्तैर्मधु स्तैर्मधुभिः

त्रि:शांत:स्यादयंमदनानलः मुखकमलमधुपानादेव शांतो भवेत्तदा त्वौनिमग्नानि बहूनि
संति। तान्यादायकथंनरिवसितत्राह॥ मुखकमलमधीति। लोकिकाग्निनान्येन। तदधरम
धुरमधूनि पिबंतां इत्युक्तत्वात् स्मिष्यति कामपि चुंबति कामपीति दृष्टत्वात्तेन दाहो न निवर्त्ते
॥ किं तत्राह॥ तवेति। त्वन्मानकरणकृणोत्पन्नत्वात्तत्पानानंतरं शांतः॥ यदि शांतो जातः स्या
त्तदा त्वां हृदये आधायता: कथं त्यजेयं देवोत्पन्नत्वात्तस्त्वन्मुखकमलमधुपानं देहीति॥
प्रार्थयामि। ननु प्रार्थितं दीयते तदा स त्वया प्रार्थितः कथं नागतोऽहमपि प्रार्थितं न दास्यामि
तत्राह॥ चारुशीले त्विति। या च। या प्रिया चारुशीला भवति सा एवं स्वमन्यकृतं न विधारयति। स
म्य कालरा दास्यामितत्राह॥ सपदि इदानीं मानसं दहति तस्माद्विलंबो न कार्यः॥ दहत्य माना
यदेयमिति। तदा प्रदोषे रात्रिमुखेऽधकारेऽकाले कथं दानमित्यत्राह॥ वदसीति। हे प्रिये
यदि किंचिदपि याहि माधव मा वद कैतववादं मीर्घ्यासरोषमपि वदसि तदा तव दंत रु

रुचिकौमुदीदंतकांतिर्ज्योत्स्नातिघोरंतिमिरांधकारंहरति। तथाच। तववदनचंद्रमसिस्फु
रत्अधरसीधवे॥ उत्स्फुरिताधरसुधापानार्थंममलोचनचकोरंरोचयति। साभिलाषं
रुचिमुत्पादयति। जयनयोश्चकोरत्वेनतदेकजीवत्वमुक्तंप्रदोषंधकारेचकोरैकाजेकथं-
ददामीत्युक्तत्वात्। दंतरुचिकौमुद्याश्चंद्रमसः॥ सापेक्षत्वात्तववदनचंद्रमसापितिमिरां
धकारनिवृत्तिश्चोक्ता॥ किंच॥ एवंसख्योक्तंवदतिचगलितविलोचनजलधरमाननक
मलमुदारं॥ विधुमिवविकटविधुंतुददंतदलितगलितामृतधारमधुनापिकिमिति
विषीदसिरोदसिविकलेत्युक्तेसाध्वेततववदनचंद्रमाविधुंतुदसंयोगादेवंविधयद
एकालेवाकालेपिदानमावरूपकलाद्वियमिति॥ भावोऽज्ञापिन॥ किंच॥ एवमुक्तेलोच
नचकोरैकजीवनंप्रतिरोषोनोचितः॥ क्रियतेचेत्तर्हिविंकर्चित्याह॥ सत्यमेवासीति
॥ सत्यमेवासियदिसुदतिमयिकोपिनीदेहिखरनखरशरघातं॥ घटयभुजबंधनंजन

यरदखंडनंयेनवाभवति।सुखजातंप्रियेण॥ ॥२॥ ॥हेसुदतिदंतरुचिकौमधुकलात्सुदतिसंबोधनं।सुष्ठुदंतायस्यासा।दंतास्फुरत्यायेवर्द्धमाणंजनयरदखंडनोक्तौतथादंतक्षतरखंडनंविधेयं।यथाधरपीडनमवेदित्याज्ञायोज्ञापितः॥यदिसत्यमेवमयिकोपिन्यसितदाखरनखराणवशरसंघातंदेहि।देहीतिदानोक्त्यासुपात्रेसुकालेयाचितंत्वदानात्दयेत्तत्कालमद्धयंतत्वाशिश्वनविष्यतीतिसूचितं।तिननुष्यसितदाभुजबंधनंघटयःसूचितः।तेनाप्यसंतोषस्तदाहृदयखंडनंजनय।दंतैःखंडय।घटयोक्त्याऊचघटत्रर्थादिधरं।वायेनकृत्येनसुखसंजातंसुखं।सुखंसम्यक्जातंभवति।सुखसम्यक्उत्पद्यतेतदेवकुर्वितियदाज्ञायः।स्वकीयेपराधिनिदंडापेक्षितोनोपेक्ष्यइतिभावः।ननुयातवप्रियासैवदंडंकुर्वितिचेत्त्राह॥त्वमसिममजीवनमिति॥ ॥त्वमसिममजीवनंत्वमसिममभूषणंत्वमसिभवजलधिरत्नं।भवतुभवतीहमयिसततमनुरोधिनीतत्रममहृदयमतियत्नं।प्रियेण॥३॥ ॥स

दुःखेप्राप्तेसमागतेप्रण्यादिसर्वैकपादपतितंप्रियंअग्रेस्थितंतंविलोक्ययामानंनात्यजत्।प्रतिरहःएकांतेनीत्वायथाहरिर्नश्रुयात्तथाउवाच।।कीदृशीं।।मन्मथखिन्नां।मनसःमथनाकारकेनकामेनखिन्नांदुःखितां।यतोरतिरसभिन्नांरतिरसाद्भिन्नांभेदंप्राप्तां।अतएवविषादसंपन्नांविषादःसंपन्नोयस्यास्तां।मामनादृत्यान्याभिःसहरतिःकृताइतिरसभिन्नामित्येवंविधोविषादस्तेनसंपन्नां।कीदृशीं।अनुचिंतितहरिचरितां।पूर्वोक्तंमरणंदृष्ट्वातदनंतरंअनागमनेनअनुपश्चाच्चिंतितंहरेःसकलदुःखहर्तृत्वस्यचरितमाचरितंकामपिमधुरिपुणासमुदितमदनेत्याद्येवंविधंअनुचिंतितं।हरेश्चरितंययासातां।अतएवकलहांतरिता।तच्चरितमनुचिंतनात्कलहंअंतरितः।याहिमाधवइत्यादिरूपः।यया।मन्मथखिन्नांविषादसंपन्नांअनुचिंतितहरिचरितामपिअनुनयविनयादिकमयेवदंतंप्रियंदृष्ट्वानंतरंसमुत्सुकापिविषादःमानावष्टंभितत्वात्कलहांतरिताजातेतिभावः।सायथाययासखीनांपुरःपादपतितंवल्लभंरुषा।निर

स्यपश्चात्तपति।कलहांतरितासेति।एवंविधांतांप्रतिकिमुवाचेत्याकांक्षायामाह॥हरिरभिसर
तीत्यादिना। ।विराडीरागेणगीयते॥ ॥हरिरभिसरतिवहतिमधुपवने।किमपरमधिकसुखे
सखिभवने।माधवेमाकुरुमानिनिमानमये॥१॥अयेसंबोधनेखेदपूर्वकं।अयेमानिनी।माधवे
मानंमाकुरु।त्वमनयासहरमणशंकयामानयुक्तासितथाप्ययंमाधवः।मालक्ष्मीदेवीकृष्णमयी
प्रोक्ताराधिकासर्वदेवता॥सर्वलक्ष्मीमयीसर्वाकांतिसंमोहिनीपरेतिवाक्याल्लक्ष्मीत्वमेवतव
भर्त्रीरसानांनरणपोषणंत्वय्येवकरोतीतितथात्वय्यनुरक्तोयोरसस्तस्यतात्पर्यज्ञानार्थम
न्यत्ररममाणोपिलक्ष्मासाम्यमनलक्ष्यमाणोजातः अतएवराधामाधायहृदयेतत्याजव्रजसुद
रीरित्युक्तमितिभावः॥वस्तुतोमाधवेलक्ष्मीपतौमानंमाकुरु।तेनरसोत्पत्त्यर्थंपरकीयत्वंज्ञापि
तमितिभावः॥ननुकिमेतावताअहंभवनेतंविनादुःखितास्थितामाधवोयंलक्ष्मीपतित्वाल्ल
क्ष्मीवंतोनजानेतिप्रायेणपरखेदनाभिवेत्तत्राह॥हरिरभिसरतीति॥ ।हेसखिभवनेहं

रूपं तत्र त्वं मत्प्रियासि न किंतु मम जीवनं त्वमसि। जीवापेक्षया जीवनं त्वधिकं। जीवत्येते येन तज्जीवनं। जीवनं विना जीवोतिदुःखितः स्यात्। तत्तु एवमिव परोक्षे चोक्तं। किं जनेन धनेन मम जीवितेन सुखेन वा। जीवने संपन्ने भूषणमपेक्ष्यते तद्भूषणमपि त्वमेवाभूषणं हृदि धार्यते। तदपि परोक्षे साक्षात्प्राप्तौ चिंतनेन राधामाधाय हृदये तास्पक्ता अत्र त्वदतिरिक्ता। कापि जीवनादिकं नास्ति तदान्याप्रियाकाकिंच त्वमसि भवजलधिरत्नं। जीवनादिके संपन्नेऽद्य त्वं रत्नं विना सर्वं व्यर्थं। तदपि भवजलधिरत्नं भव। संसारः स एव समुद्रस्तत्कात्रात्त्वमेव रत्नं प्राप्तं। यथा कश्चिद्रत्नाकरं विचिन्वन् चिंतामणिं प्राप्यात्मानं कृतार्थं मनुते तथा भवजलधावस्मिंल्लोके स्त्रीरत्नं त्वां प्राप्य कृतार्थोस्मि अत्र तत एवंविधा भवती मयि सततं दृढास्मिन्संसारे अनुरोधिनी भवतु अन्यत्रगमनेऽनुरोधं करोतु। तस्मिन्नर्थे मम हृदयं अतित्वरायय यत्ने अतित्वरायेन यत्नो यस्मिंस्तत्र। एतदर्थं मम हृदयमतित्वरायय यत्नं करोति। मदनुरोधिनीयं

नवतु।अनुसंधत्ते ययासानुरोधिनी।एवमुच्यमानं।श्रीकृष्णंसरोषदृष्ट्वापश्यत्।एवंविकृतत्वं
मांत्यक्त्वामुग्धवधूनिकरेविलसितःवचनंएतादृशमिति।।तथाविधांवीक्ष्यतामुवाचेत्यत्रा
ह।। ।।नीलनलिननाभमिति।। ।।नीलनलिननाभमिनितन्वितवलोचनंधारयतिकोकनद
रूपं।कुसुमशरबाणभावेनयदिरंजयसिकृष्णमिदमेतदनुरूपं।।प्रिये०।। ।।४।। ।।धार
यति।किंतवलोचनेरजनीरक्तीकरणीविद्याप्रसिद्धा।अनयारंजनाविद्ययायदित्वंकुसु
मशरकामबाणकटाक्षभावेनरोषभावंत्यक्त्वाकृष्णंमांरंजयसितदैवैतन्नयनानुरूपंयो
ग्यंभवेत्।।शिक्षिताविद्यान्यत्रप्रयोगेणैवसार्थाभवेदितिभावः।।एवंमांरंजयित्वात्वमपि
रंजताभवेत्यभिप्रायेणाह।।स्फुरतुकुचकुंभयोरुपरिमणिमंजरीति।। ।।तत्प्रकारमाह
।।स्फुरतुकुचकुंभयोरुपरिमणिमंजरीरंजयतुतवहृदयदेशं।।रसतुरसनापितवजघ
नघनमंडलेघोषयतुमन्मथनिदेशं।।प्रियेण।। ।।५।। ।।कुचकुंभयोरुपरिमणिमंजरी

मणिमालास्फुरतु तया तव हृदयदेशं रंजयतु। पूर्वं विरहे त्यक्ता रत्नानापितवज्रघनमे
खले रसतु रसावदानवतु। तया मन्मथनिदेशं घोषयतु। कामशास्त्रोक्तरतिसमये रत्नाना
शब्दप्रकटीकर्त्रीति वचनभंग्या प्रार्थनाविशेषोयमिति तव कामनावावलोकनेनैव तत्सर्वं
भविष्यति। इत्याशयः। सयथा। तिलकस्य सुकृतमधुना प्राप्तं पत्रा। द्विकर्णिकारणां। अपि
चेद्धास्यसि मत्त्वं हस्तस्थितमेव ऊरुं बकैश्वर्यमिति। तिलकालोकितो नास्तिका। एकारः प्र
बोधितः कामिन्यालिंगितः अर्थात् विकारं च ऊर्द्ध्वशक्तिं च॥ एवं तव हृदयदेशे रंजिते मम
पि हृदयं रंजितं भवति इत्याशयेनाह॥ ॥स्थलकमलगंजनमिति॥ ॥स्थलकमलगंजनं
मम हृदयरंजनं जनितरतिरंगपरभागं॥ भणमसृणवाणि करवाणि चरणद्वयं सरसल
सदलक्तकरागं॥ द्विवेणाह॥ ॥तरुणस्फुरस्पर्शपरवशः सन्प्रार्थयते। [illegible]मिति॥ एत
च्छ्रवणेनैव किंचित्प्रसन्नां वीक्ष्याह। हे मसृणवाणि हे स्निग्धवचने भणमसृणा। स्निग्धा

वाणीयस्यास्तस्याः संबोधनं तथा। एवंविधे त्वमाज्ञापय मां तच्चरणद्वयं सरसमलक्तक
रागं करवाणि सरसेन लसता लक्तकेन रागो यस्मिंस्तत्। तद्रागयुक्तं करवाणीत्यर्थः। की
दृशं। यतः स्थलकमलगंजनमिति॥ स्थलकमलं गंजयतीति तिरस्कारकमित्यर्थः॥ स्थलक
मलो लक्ष्म्या सर्वदा सरसं तिष्ठति। जलकमलं जलं विना म्लानं भवेदिति तस्मात्स्थलकमलो
क्तमिति भावः। पुनः कीदृशं मम हृदयरंजनं। मम हृदयं रंजतीति तथा। एवं करणे मम हृ
दयरंजनं भवति। कुतः। पुनः कीदृशं। जनितरतिरंगपरभागं। यतः जनितो रतिरंगे परभा
गः परमउत्कृष्टाभादीप्तिं गच्छति प्राप्नोतीति परभागः। परमा शोभा येन तत्। रत्यामास
नबंधविशेषे हृदयगते सत्परमशोभाजनकमिति भावः॥ रसो वै स इति वचनात्सात्म
कोभगवांस्तस्य कलरसभोक्ता तद्रसः परवशः सन् पुनः प्रार्थयत इत्याह। ॥स्मरग
रलखंडनमिति॥ ॥स्मरगरलखंडनं मम शिरसि मंडनं देहि पदपल्लवमुदारं। ज्व

लतिमयिदारुणोमदनकदनानलोहरतुतदुपाहितविकारं॥ ॥७॥ ॥हेप्रियेममाशिर
सिएवंविधंपदपल्लवंधेहि।अर्पय।ननुभगवानेवंकथमेवमनुचितकरणंप्रार्थय
सीत्यत्राह।कीदृशं।स्मरगरलखंडनं।यथागरलंखंडनार्थमनुचितेभ्योमंत्रौषधादिकंम
नुचितमपिशीर्षेधीयतेतथास्मरगरलंखंडयतीतितत्प्रार्थयामितत्रभवतोमेमंडनंस्मरगरलखं
डनान्मंडनंभवेत्तत्रस्मरगरलखंडनंकथंकरोतीति।कीदृशं।उदारंवांछितदातारं।पु
कीदृशं।मंडनंभूषणरूपं।स्मरगरलेकिंभवतीत्याकांक्षायामाह।ज्वलतीति।मयीमद
नकदनानलः।ज्वलति।मदनःकामस्तस्यकदनकर्त्रीयोनलःअग्निःमयिविषयेज्वलति।यथाका
ष्ठेस्थितःकाष्ठंज्वालयतितथामयीतिभावः।अतस्तेनोपाहितमुत्पादितविकारंहरतु।त
द्वारणमात्रेणैवतापोपयास्यतीत्यर्थः॥मदनकदनारुणेतिपाठेपूर्वोक्तमदनकदनरूपो
योरुणःसूर्योवामयिज्वलति।अरुणःस्फुटरागेस्यात्सूर्यसारथ्यावितिविश्वः॥मिह।

रारुणभीषण इत्यमरः॥ मयि ज्वलति इत्युक्ते इति ज्ञापितं। यथाग्निः काष्ठे ज्वलति न शाम्यति चे
त्तदा पार्श्वस्थस्य तापमुत्पादयेत्तथायमग्निर्मयि ज्वलति सति न दूरसि तदा त्वमपि तापयुक्ता
भवति अतः स्मरगरलखंडनं तव पादपल्लवं। यथा सर्पादिविषं दष्टानज्ञानस्मृत्या बाधते।
तथेदं स्मरगरलं जरठं बाधते तद्बाधाखंडनं तव पादपल्लवं। (यथा सर्पादिविषं दष्टानज्ञानस्मृ
त्या बाधते तथेदं) धृत्वा तदुपरि हितविकारं हरान्नु अत एव तव शिरसि धारणं महदनुचित
मित्यत्राह। उदारमिति। य उदारो भवेत्स पात्रापात्रमुचितानुचितं न विचारयति यो यत्प्रा
र्थयति तत्तं ददाति। किमतः परं प्रार्थयामीत्यर्थः॥ इदं भगवदुक्तं जयदेवेन भणितं तत्रा
ह॥ इति चटुलचाटुपटुचारु मुरवैरिण इति॥ ॥इति चटुलचाटुपटुचारुं मुरवैरिणो राधि
कांचनमधिजातं जयतु पद्मावतीरमणजयदेवकविभारतीभणितिमतिशातं॥ ॥८॥ इ
त्युक्तप्रकारं मुरवैरिणः॥ राधिकां अधिवचनजातं जयति॥ परमाजेयमुरदैत्यस्य परिखु

ज्जीवकत्वात्तस्य राधिकां अधिलक्ष्मीरूपयज्ञातं वचनं वचनं वदसि यदि किंचिदपीत्यादिरू
पं तज्जयति। वर्त्तमानत्वान्नित्यत्वमुक्तं लीलायाः यथा जेयमुरदैत्यः षोडशसहस्रराजकन्या
रोधकत्वं नाशयित्वा राजकन्यानिमुखोजातस्तद्विधराधाप्राप्तिरोधकं मानंनाशंकृत्वा श्रीराधा
सन्मुखीकरणान्मुरवैरिपदोपन्यास इति भावः॥ कीदृशं वचनं। चडुलचाडुपडुचारुचडुल
नानाप्रकाररसव्युत्पादकं चाडुप्रियवचनं पडुमानापनयनसमर्थं चारु मनोहरं। मानं मनोधीनं
तद्धरणाच्चारु। पुनः कीदृशं अतिशांतं अत्यन्मनोहरं परवशकरणात् दुःखदं स्यादिदं। शाति
सुखदं। शर्मशातसुखानि चेत्यमरः॥ इदं केन भणितं तत्राह॥ ॥पद्मावतीति॥ ॥पूर्वोक्ता प
द्मावती राधा तां आनिरमणकर्त्ता श्रीकृष्णकर्तृक्रीडायां जयप्राप्तत्वाज्जयदेवः कविस्तस्य भा
रती दीप्तिरसव्युत्पादका वाणी चाडुत्वादिरूपा तया भणितं। तदतिशांतं। जयति। यद्वा। पद्मा
वती श्रीराधा तत्परतया तथा नाम्नी पद्मावती जयदेवस्य भार्या तस्या रमणः जयदेवकवेर्भार

तीसरस्वनीतव्य ..णितंदिचतारूपत्वात्तनन्तुकथंमाऽऽशर्थेयसे।मांत्यक्त्वान्यसंभोगार्थं
मेतावत्कालपर्यंतंस्थितस्तांप्रार्थयत्याशयेनाह॥परिहरकृतातंकेति॥ ॥परिहरकर्ता
तंकेशंकांत्वयासततंघनस्तनजघनयाक्रांतेस्वांतेपरानवकाशिनी॥प्रविशतिनाविशतिवि
तनोरन्योधन्योनकोपिममांतरंस्तनभररंभारंभेविधेहिविधेयतां॥एहेकृतातंकेपि॥
कृतोन्यस्त्रीसंभोगंप्रतिआतंकविकारः।वितर्कशंकोधेया:हेतथाविधे॰तांशंकांपरिह
रसमंतात्यजा।कथंघनस्तनजघनयासततमाक्रांतेस्वांतेमनसिवितनोरन्यधन्यःकोपि
ममांतरंप्रविशति।नप्रविशति।त्वयानिरंतरंआक्रांतेप्राप्तेस्वांतेनतनुरहितत्वात्कामा
दन्यस्माग्यवान्कोपिजनःनप्रविशति।यद्वा॥धन्यःकोपिब्रह्मापिनाभिनालोऽत्पन्नत्वा
त्स्वांतेनप्रविशतितदन्यःकथंप्रविशतिआशयः।वितनोरन्य'कथंस्वांतेनप्रविशती
त्याकीदृश्यामाह।कीदृशेस्वांते।परानवकाशिनी।परस्यावकाशरहिते।कथमव

काशो नास्तीत्यत्राह ॥ पुनः कीदृशे । त्वयाक्रांते । त्वयैवाक्रांते व्याप्ते । कीदृश्या त्वया । घन
स्तनजघनया । घनावृतौ कठिनौ स्तनजघनौ यस्यास्तया । एवंविधया त्वयाक्रांते मनस्यव
काशराहित्ये कथमन्यो विशति । मनोधारयान्यंतरंखविरपत्ते । तद्वत्त्वया व्याप्तं । केन पंथान्ये
न प्रविष्टव्यमतस्तां शंकां परिहरेति भावः ॥ शंकां त्यक्त्वा किं कर्तव्यमित्यत्राह ॥ प्रणयिनि परि
रंभारंभे विधेहि विधेयतां कर्तव्यतां विधेहि । विधीयतामित्यर्थः ॥ यद्वा ॥ प्रणयिनि मयि
प्रणयस्नेहातिशयो विद्यते यस्मिन्नेवंविधे मयि परिरंभारंभे विधेयतां विधेहीति भावः ॥
किं विधेयतामित्याकांक्षायां विधेयतामाह ॥ ॥व्यथयति वृथा मौनमिति ॥ ॥व्यथयति
वृथा मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः सुमुखि विमु-
खीभावं तावद्विमुंच न मुंच मां स्वयमतिस्निग्धे मुग्धे प्रियोऽहमुपस्थितः ॥ हे तन्वि ॥ म
दालंबनभावात्सं[illegible]गामि । वृथा निदानं कृतं मौनं मां व्यथयति । व्यथयतीति पाठे वृथा मौनं ॥ २ ॥

Geeta Govinda
Bhava Prabodhini

गीत॰भाव॰

१९३

विस्तारयति।मदालापमनावालंकृष्णासि।इत्थानिदानेकृतंमौनंमांव्यथयति।इत्थायति।
पा।वेइत्थामौनं॥तत्सत्का॥सर्वेपंचमंस्वरंजपंचया।पंचमस्वरश्रुतंवरेवनंस्वयेत्यर्थः॥नन्व
हंतन्वीकृष्णाचेत्सदापंचमंजपंचनंकथंनवेदिकोंद्वायामाहा।हेतन्वियद्यपितन्व्यासितथा
पित्वंतरुणासि।तारुण्येपस्वनादोत्कृष्णापिसमर्थानभवति।[illegible]।ध्वरात्वात्पंचमजपंच
नेऽक्रमतासात्सदामधुरालापैस्तापंविनोदयनोदनेनेरण्ययस्मिन्नेवंविधंकरु।इत्थामौ
नेनकृतं।इत्यादितंतापमपसारयेत्यर्थः।मधुरालापैर्द्धमतायामपिइहंहिंनिःकृत्वात
पनया।कथयद।मधुरालापैःइहंहिंनिःमधुरालापपूर्वकावलोकनैःकृत्वातापंनाशय।
मधुरालापैर्हिहिरितिवजंवचनोरूपा।यथाक्रूमिलोबकान्नंप्राप्यनि।तथालितसःस
न्मधुरालापपूर्वकावलोकनंप्रार्थयतइतिभावः।तत्त्वंहेसुमुखीविधुशोभनं
मुखंयस्यासा।एवंविधसुखावलोकनेनैवतापापगमोभविष्यति।सुमुख्याविसुखी।

प्रबोधिनी

१९३

न्नावंनोचित्तमित्यर्थः॥यदाऽस्वैरस्कुविधेयत्तामाहाहेतन्वीतिस्वैर्विशेषणात्कत्रासित
दाहृष्यामौनंमांव्यथयतित्कस्पत्का।हेसुमुखीत्तावत्प्रथमंसुमुखत्वाद्विमुखीभावंत्यजततो
दृष्टिनिर्मधुराल्लापैस्तापंविनोदय।ततोहेतरुणि।तारुण्यस्वभावात्संचमंप्रपंचय।अत्रनुक्रमे
ण।एवंविधंा।विधेयत्वांपरिसंज्ञाविधेहीतिभावश्लोकः॥मानंमुञ्च।याहिमाधवयाहिकेशवे
त्याद्युक्तिलात्तत्यागंकुरु।यतोहेमुग्धे।विचारशून्ये।कथंविचारशून्यत्वाद॥मित्यत्राह।स्वय
मतिशयस्निग्धंप्रियोयमुपस्थितः॥यंविनापूर्वंमीमोत्रवानंदनचंदनमानिलप्रसीदरेदक्षिण
मुंचवामतां॥क्षणंजगत्प्राणविधायमाधवंपुरोममप्राणहरोनविघ्नाति।बाधांविधेहिम-
लयानिलेत्यादिप्रार्थयंतीस्थितासोयमतिस्निग्धप्रियःस्वयंउपसमीपेस्थितः।किंचतेस-
ख्यपिसमायातोक्तवत्यासीत्।निंदतिचंदनमिंदुकिरणमनुविंदति।खेदमधीरमितिरूपेण।
मपिविरहंप्रुणानसेहेइत्यादिसख्युक्त्यावस्थायीविनासीत्सः।प्रियोस्निग्धोऽनाहूतः।स्वय

प्रयंस्वकरकमलांगुलीभिश्चिबुकंधृत्वोर्ध्वमुखंकृत्वादर्शयति।पश्चात्पायंतत्समीपेस्थि
तस्त्वंमौग्ध्यान्नमुंचसियदिरोषमवलंब्यमदुक्तिप्रत्ययाभावेतर्हिस्वयमेवदंडमाचरेत्यत्राह
।।मुग्धेधेहीति।। ।।मुग्धेविधेहिमयिनिर्दयदंतदंशदोर्वल्लिबंधनिबिडस्तनपीडनानि।चं
डित्वमेवमुदमाप्नुहिपंचबाणचांडालकांडदलनादसवःप्रयांतु।।हेमुग्धेविचारशून्ये
यदित्वंरोषंनमुंचसितदास्वीयेस्वयमेवदंडमाचर।अतिक्रोधेनतत्प्रकारमाह।।हेचंडि।।
उक्ताकरणमनुक्तकरणंप्रार्थिताप्रार्थितकरणंचंडित्वं।तस्मान्मयिनिर्दयासतिदंतैर्दंश
ःदोर्वल्लिबाहूलताभ्यांबंधःवल्लेरज्ज्वाद्युभावाद्वातयाबंधनमुचितत्वात्तथोक्तिः।।निबिडा
तिकठिनस्तनाभ्यांपीडनानिविधेहि।पीडनानीतिबहुवचनात्तदग्रिममपिकृत्यंज्ञापितं।ए
वंविधायत्वमेवमुदंचप्राप्नुहि।।स्वीयेऽन्योदंडंनकुर्यात्।।अन्यःकः।।करोत्वित्यत्राह।।नपंच
बाणचंडालकांडदलनादसवःप्रयांतु।पंचबाणोमन्मथः।सएवचंडालःकृतःएकस्मिन्यं

च्बाणैस्ताडनात्त्वयापितथाज्ञात्वापूर्वंप्रार्थितत्वात्॥ पंचबाणप्राणान्यदृणेति॥ अब।
लास्त्रीप्राणहारकोयमेवायस्तथा। कांडदलनाच्च॥ विषाविष्ठितो बाणः कांडपदवाच्यः। सवि
द्धः सन्निकासितोमार्गः सरतितेनकृतानिरंतरंदलनेपीडनंचजायते। तद्दलनासवः प्रा।
णाः प्रकर्षेण यांतु। चांडालहस्तात्प्राणमागच्छंतु। अत्रसर्वबहुवचनंगौरवायविष्टतासवइत्यु
क्तत्वात्। सवस्तदीयाएवतेषामपिचांडालकांडदलनादसवोनिर्गमनंनोचितं। तेनत्वंमुदंन।
प्राप्स्यसि चांडालकांडदलनादसवनिर्गमनाद्वेडिकृतदंकोचरइत्यपिसूचितं॥ ननुविश्व
स्पृष्टात्वयैवंविधोसृष्टस्तवप्राणागमनंकरोति तंकथंनमानयसितत्राह॥ बंधूकद्युतिइति॥
बंधूकद्युतिबांधवोयमधरस्निग्धोमधूकच्छविर्गंडिश्चंडचकास्तिनीलनलिनश्रीमोचनं
लोचनं॥ नासान्येतितिलप्रसूनपदवींकुंदाभदंतिप्रियेप्रायस्त्वन्मुखसेवयाविजयते।
विश्वंसपुष्पायुधः॥४॥ ॥पंचपुष्पाकृतिभुक्तंतेषुपंचपुष्पायुधरूपतामादधाति। अतो

गीत०भाव०
१९५

हे प्रिये सोपि सिद्ध पुष्पायुधः प्रायस्त्वन्मुखसेवया विश्वं विजयते तन्मदात्मकत्वात् । मां
कुन्तोतीतीतिनं गणातानि स्तौति कीदृशानि पुष्पाणि बंधूकं द्युति बांधवोयमधरः । अत्रे गुलीनि
कटेकत्वास्तद्भावं ददाति । अयं त्वदधरः बंधूकः पुष्पविशेषः । सा मध्याह्ने विकसति । दु
पारिया लोकवाच्यः । तद्वर्णोहितसाम्यतया तस्य द्युतेर्बांधवत्वात् तत्पुष्पं कामस्यायुधं । तव
गंडस्तस्यायुधस्य मधूकस्य स्निग्धा कांतिश्चकास्ति दीप्यते । पांडुर स्निग्ध साम्यत्वात् ॥ त
वलोचनं ज्ञात्वा निपाये लोकवचनं तस्यायुधस्य नीलनलिनस्य श्रीः शोभा तस्याः मो
चनं । अत्र नीलनलिनपदेन सपाणिपानावात्कोकनदत्वानावश्योक्तः । कार्ष्ण्यसाम्यत्वान्नी
लनलिनोक्तिः । तस्यायुध तिलपुष्पं तव नासा तिलप्रसूनपदवीं अभ्येति तिलपुष्पसा
म्यतां प्राप्नोति । हे कुंदाभदंति । कुंदकुसुमकलिकाया आभा इव आभा दंतानां यस्याः सा
कुंदाभदंतीयस्याः सा । कुंदाभदंती तस्याः कुंदाभदंति संबोधनं कामस्य कुंदकुसुममायु

प्रबोधिनी०

१९५

धमिति। एवंविधस्योद्वेगकर्त्तुः कुसुमायुधस्य पदपातकरणात्संबोधनमाह। हे चंडि यद्यपि त्वं प्रि-
यासि। एवंविधं कुसुमायुधस्त्वन्मुखादुक्तिरूपाणि कुसुमाण्येवायुधान्यजेयानि तद्बलकः सन्न विश्वं
जयते। तस्माद्विश्वालकं मामपि तथा करोति॥ किंच। भ्रूपल्लवं धनुरपांगतरंगितानि
बाणा गुणः श्रवणपालिरिति स्मरेण तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगं-
ति किमर्पितानीत्युक्तत्वादेवंविधस्य पदपातात्तथा संबोधनमिति भावः। तस्मान्नान्या-
यः। नत्वहं चमी चेन्न वामि तदा तादृशमेव करोमी चेत्तत्राह। हे प्रिये एवंविधापि त्वं मम प्रिया-
सि प्रियं यत्करोति तदेव प्रियं तस्य यथा। यदेव रोचते मह्यं तदेव कुरुते प्रिया। इति वेत्ति न
जानाति यत्प्रियं कांतस्ताहिसेति। तथात्रतः कदाचित्कोपवशादेवं करोषि। तदेव मम
प्रियमसीति भावः। मम कोपो नास्त्येवेति चेत्तत्राह॥ शशिमुखाति॥ ॥ शशिमुखि त-
व भाति भंगुरभ्रूर्युवजनमोहकरालकालसर्पी। तदुदितभयभंजनाय यूनां त्वद।

धरसिंधुसुधैवसिद्धमंत्रः॥ ॥५॥ ॥एवं विमुखीभावपूर्वकं स्थिता तदा सुमुखी विमुखी
भावं मुंचेत्यादिवचनानि श्रुत्वा एवं यदुन्मुखे विमुखतां याता तासीति सख्युक्तमपि श्रुत्वा नमासी
त्ततः किंचित्सन्मुखीभूतां हृष्टवतीं वीक्ष्य तामाह॥ हे शशिमुखी॥ शशिवत्तापहारकं प्रका
शयुक्तं मुखं यस्याः हे एवंविधे तव भंगुरभ्रू भाति। कोपेन तव वक्रा भ्रुः शोभते कोपे शोभा·
कथं शशिमुखत्वाच्छोभा न कोपश्चेद्भ्रुवोर्भंगुरत्वं कथं सहजैव वक्रा न कोपस्तत्राह॥ कीदृ
शी युवजनमोहकरालकालसर्पी। युवजनस्य वयसा सामर्थ्येनैवंविधमपि जनस्य मोहोत्पा
दिका करालाभयंकरी कालरूपा सर्पी भयोत्पादिका कोपादित्यर्थः॥ यथा सर्पी दृष्टा तु वाद
शा तु तथापि दृष्टा सती भयजनिका भवति तथेयं तव भ्रुः तर्हि किं योक्तं मुग्धे विधेहि मयि निर्द
यदंतदंशमेवं विधायाद्युक्त्या हृष्टस्य तद्दोषधान्यावादनर्थापत्तिरेवं स्यात्तत्राह॥ त २
दुदितभयभंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्र [illegible] इति॥ तस्या उदितोत्पन्न·

ज्जयस्यनंजनायनाशायदष्टानामस्माकंत्वदधरएवसिधुसुधैवसिद्धमंत्रोनस्यात्तदानर्थी
पत्तिरेवात्तत्तन्निकटस्थःसिद्धःपठनापेक्षारहितत्संबंधादेवकरालकालसर्पी॥स्फूपातव
स्फूः ततःउदितज्जयनिवर्त्तनायास्माकंदष्टानांत्वधरसीधुसुधैवसिद्धमंत्रस्त्वर्थः॥स्फुरित्येक
वचनेनकोपस्फुरणायाग्रेसन्मुखस्थातुमशक्यत्वाद्दक्षिणतोगेस्थितंप्रियमेवंवदंतंवक्री
कृतयीवयैकदृष्ट्यावलोकनादिकांतथाविधांस्त्वंदष्टत्वादिकवचनं।दष्टानामस्माकमिति·
वक्तृवचनं।तस्याःप्रसन्नतामात्रलब्ध्यामानःवक्तृत्वमननात्सीधुसुधोक्तःपामादकत्वात्सी
धुमधुरत्वात्सुधेत्युक्तं॥यथामृतंकालसर्पदष्टजीवनसंपादकंतथेदमपित्वदधरसीधु
सुधेत्यर्थः॥ननुकालसर्प्यदष्टज्जयनिवर्त्तकममृतंतत्तुत्वंमदधरामृतंचेत्तदाकि[illegible]न्यःस
कारात्तदानीयपीत्वामञ्ज्ञांसर्पीज्जयनिवर्त्तनीयमितितत्राह॥दृशौतवेति॥ ॥दृशौतव
मदालसेवदनमिंदुसंकाशकंगतिर्जनमनोरमाविधुतरंभमूरुद्वयी।रतिस्तवकलाव

तीरचितचित्रलेखे भ्रुवावहो विबुधयौवनं वहसि तन्वि पृथ्वीगता ॥६॥ विबुधयुवतय
स्तदमृतं तत्कालवदंगामृतं वीक्ष्य तदंगेष्वाश्रितास्तिष्ठंति ॥ अतो हे तन्वि अहो इत्याश्चर्ये हे
तन्वि कृशासि पृथ्वींगता विबुधयौवनं वहसि। विशिष्टं बुधज्ञानं येषां ते विबुधा देवास्ते
षां यौवनं युवतीसमूहं देवैः सह मिश्रीभूतास्ताः कांचिदपि म्लानिं न भवेयुस्तदमृतं तात्का
विशिष्टज्ञानवतां यौवनत्वात्तारतम्यं ज्ञात्वा त्वदंगमाश्रितं जातं तत् वहसीत्याश्चर्यं। कथं व
हसीत्यत्राह। तव दृशौ मदालसे इति। प्रसन्नतां ज्ञात्वा सत्वरस्वागतदृष्टिछ्या लोकनं दृशा

विति ॥ मदेनालसे। स्वर्गे त्वेकैव मदालसा विबुधयुवती त्वं मदालसे द्वे धारयसीदमप्या
श्चर्यं। देवांगनाकापरूपीत्वात्। दृशौ वीक्ष्य रूपद्वयं। कृत्वा निर्वचनीयतद्दृग्योग्यामृत
पानार्थमाश्रितेति ॥ सा निशायं वचनं। तद्दृग्योग्यामृतं स्वयमेवेति। ज्ञात्वा तत्प्रथमं दृशा
नुरूपा दृष्ट्याश्रितत्वात् दृशा वितृष्णामिति भावः ॥ वदनं तवेंदुसंदीपनं। इंदुस्तु दृष्टिक्षा

Geeta Govinda
vallabhacharya
Bhava Prabodhini

संभजंतिइदंसदासंदीपनं।विबुधयुवतीकुसंदीपनिनाम्न्यस्ति।सात्वद्वदनमाश्रितापूर्वो
क्तिप्रायेणइंदुमत्यास्पदमितिपाठे।इंदोर्मतेरास्पदंतववदनं।इंदुमतीनाम्नीदेवांगनास्यास्प
दंतस्मात्त्वद्वदनास्पदमाश्रितत्वाद्वदनमिंदुमत्यास्पदमुक्तं।गतिस्तवमनोरमामनसःआ
ह्लादकारिणी।तन्वीत्वंकृष्णाभिगमनात्राकापिप्रियंप्रत्यभिसरणेतवगतिमनोरमाभव
ति।जनमनोरमेतिपाठेपूर्वोक्तसमयेमद्विधजनस्यमनोरमा।तत्रजनमनोरमानाम्नीदेवां
गनातवगत्याश्रिता।प्रियमभिसरणसमयेकोप्यनिर्वचनीयमिलनाभिलाषानंदामृतपाना
थिमाश्रितातिष्ठति।सायथा।अभिसरणरसःकृशांगछेरयमरनवीहितःश्रुतोवा।अहम
पियदीयंनिरामनोज्ञोनिर्विक्षितनूपुरमात्मनीनबुध्यति।।मनोरमाविधुतरंभमूरुद्वयं।वि
धूतातिरस्कृतारंभाकदलीऊरुद्वयेनतत्।तत्ररंभानाम्नीविबुधवधूःसोरुद्वयमाश्रिता
रंभात्वेवाकथमुरुद्वयमाश्रिता।रंभापदंत्यक्त्वाविबुधरंभमूरुद्वयमुक्तत्वात्।विधुते

Shri Geeta Govinda
Bhav Prabodhini

रंनेयेनोरूद्वयेनाऽयमपि कामरूपी देवांगनात्वाद्रूपद्वयं कलाश्रितेत्यर्थः॥ स्वयमतिमृद्वी॥
प्रियकरस्पर्शामृतपानार्थं तदूरुद्वयमाश्रिता विद्युल्लता जातेत्याशयः॥ रतिस्तवकलावती
नवरतिः सुरतक्रीडां कोकशास्त्रोक्तनानासनबंधविशेषचतुरशीतिकलातद्वती॥ यद्वा
॥ रतिप्रीतिस्नेहातिशयरूपा सा नानाप्रकारभावकलाकल्पनातद्वती॥ यद्वा रतिसुचिम
नोभिलाषाया कलाकौशल्यं तद्वतीत्यर्थः॥ तत्र कलावतीनाम्नी देवस्त्री सा नवरतिरूपा
सर्वास्तिकोकोक्तरतिशास्त्रोक्तानसामयिकानिर्वचनीयसुखातिशयामृतानुभावार्थं
माश्रिता॥ यद्वा॥ रतिः कामपत्नी सा नवकलावती रतिक्रीडायां पूर्वोक्ता चतुरशीतिश्चास
नबंधकलारूपा तद्वती॥ रुचिरचित्रलेखे भ्रुवौ॥ तव भ्रुवौ रुचिरे मनोहरे॥ चित्रलेखेव॥
यथा चित्रलेखितेन वतस्तथा तव भ्रुवौ रुचिरे च चित्रलेखेव॥ ननुउक्तंभ्रुवोस्तव भाति
मंयुरन्कस्वजनमोहनकरालकालसर्पी॥ अधुनोच्यते रुचिरचित्रलेखे भ्रुवावि

त्तिविरोधापत्तिस्तत्रोच्यते। एवंमुक्त्वासाकोपामानावस्थायांतथा। अत्रतुरतिस्तवकलावतीरुचिरचित्रलेखेभ्रुवावितिरतिःकलावतीसामीप्योक्त्याइतीदशायांरतिसुखसमयरसालसयानिसहनिपतितमङ्गतयोक्त्वातदावस्थायांतुरुचिरचिरचित्रलेखाचांचल्याम्रावात्त। यतोवैवक्ष्यमाणमारांकेरतिकेलिसंकुलरणारंभेतयासाहसप्रायःकांतजयायकिंचिदुपरिप्रारंभितसंभ्रमात्। निस्पंदाजघनस्थलीशिथिलितादोर्वल्लिरुत्कंपितंवक्षोमीलितमक्षिपौरुषरसःस्त्रीणांकुतःसिध्यतीत्युक्तावस्थायांतुरीतिर्भावः। स्वर्गेतुरुचिरानाम्नी। चित्रलेखानाम्नीदेवांगनेविख्यातनामष्टेतचतत्स्थानंतवभ्रुवेराश्रिते। रतिसमयेत्वदधरामृतपानकर्त्रीः। प्रियस्यभ्रुवौतवभ्रुवोरुपरिसंस्थाप्यकरणंतदप्ययेवक्ष्यमाणमयेमी। लितदृष्टिमिलितकपोलपुलकंसीत्काराधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं। श्वासोत्कंपिपयोधरोपरिपरिष्वंगीकुरंगीदृशोहर्षोत्कर्षविमुक्तनिःसह

तनोधन्योपिबत्याननमित्युक्त्वा तद्भ्रुवोः स्पर्शसुखामृतभोगार्थं तव भ्रुवावाश्रिते॥ ॥इति।
भावः॥ ॥अतो हे तन्वि दृष्टीगतात्वं विबुधयौवनं वहसि। तथापि मुग्धासीत्याश्चर्यमिति वेति
भावः॥ ॥एवं भगवद्वाक्यं श्रुत्वा सखीभावं प्राप्तः कविः परस्परं प्रीत्युत्पादकमाशिषः प्रयोज
यतीत्यत्राह॥ ॥प्रीतिं वस्तनुतां हरिरिति॥ ॥प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं
रणे राधापीनपयोधरस्मरणकृत्कुंभेन संभेदवान्। यत्र स्विद्यति मीलति क्षणमपि क्षि
प्तं वदनं तत्तरुणामलावानजितंजितंजितमिति मुग्धकोलाहलः॥ ॥७॥ ॥एवं वि
धो हरिः सकलदुःखहर्त्ता वोऽस्माकं युवयोः संबंधिनां सखीजनानामपि प्रीतिं स्नेहा।
तिशायजनसुखं तनुतां विस्तारयत्वित्याशीः। ननु हरेः प्रीतिरन्यस्त्वहरूपतेनास्माकमिति चेत्त
त्राह। कीदृशो हरिः कुंवलयापीडेन सार्द्धं रणे राधापीनपयोधरस्मरणकृत्कुंभेन सं
भेदवान्। यो हरिः कुवलयापीडेन सह रमणे राधायाः कठिनयोः पयोधरयोः स्मर

Geeta Govinda
Bhava Prabodhini

एकारकेतत्कुंभस्थलेतच्छादहरूपत्वात्तत्रभेदोनकृतवान्॥किंचातयोर्दृष्ट्या।प्रियापयो
धरस्तनत्वात्तत्स्मरणात्सात्विकाविर्भावोजातस्तत्राह॥यत्रस्विद्यतिइतियत्रयस्मिन्
रणेतत्कुंभस्थलयुगलंदृष्ट्वातत्पयोधरयोःस्मरणात्सात्विकाविर्भावात्स्विद्यतिस्वेदयु
क्तोभवति॥मिलितिचि॥अक्षिणीमिलितेच।अक्षिनिमीलनात्ध्यानंकृतवान्।एवंविधादिके
शैथिल्येजातेतदातदवलोकनकंसस्यजितंजितमितिगिरःशब्दाःसमंतात्मोहजनकःको
लाहलोजातः॥अथानंतरंतत्क्षणादेवपक्तौजातेनभगवताद्वीपेद्विपेसतीअनेनजितं
जितंइतिकंसस्यव्यामोहकोलाहलोजातोऽभूत्।एवंविधोहरिर्वःप्रीतिंतनुतामित्यर्थः॥
इतिश्रीगीतगोविंदेभावप्रबोधिन्यांमुग्धमाधवोनामदशमःसर्गः॥ ॥१०॥ ॥मानिनीमाना
पनोदनकरणेमाधवोमुग्धोजातः॥सर्गश्चैकादशश्चात्रत्रिभिर्गीतैस्तथोच्यते॥तत्रमानां
सखीवाक्यूराधामाहात्म्यमानिनी॥शांततोयक्ष्यातंतदाह॥ ॥सुचिरमिति॥ ॥सुचिरमनुन

Geeta Govinda
Bhava Prabodhini

येनप्रीणयित्वामृगाक्षींगतवतिकृतवेषेकेशवेकुंजशय्यां॥रचितविविधभूषांदृष्टिमोषेस्फुर
तिनिरवसादांकापिराधांजगाद॥१॥उक्तप्रकारेणसुचिरंअनुनयेनचिरकालपर्यंतं।सुचिरंए
तावत्कालमानापनोदेशुचिरत्वात्सकालः॥कैःराजननोभविष्यातितन्नसकालश्चिरःसुष्टुशोभ
नःकथंमृगाक्षीअनुनयेनप्रीणयित्वाअनुनयेनकृत्वाप्रीणनात्॥चिरमनुनयनकरणंक
थंयतोमृगाक्षीमृगाणांप्रीणनेनवशीकरणंदुःसाध्यंतद्वदिवतीप्रीणयित्वाकेशवेकुंजश
य्यांगतवतिसतिकापिसखीप्रदोषेराधांजगाद।कीदृशेकेशवेकृतवेषे।कृतोवेषोयेनतस्मि
न्प्रियाविरहेणपूर्वंत्यक्तोवेषोनानाभूषणादिःकृतःयतोकेशवः।राजसादिनावापन्नाया
मानवत्याःमानंत्याजयित्वामृततुल्यंसुखदानात्तथाकुंजशय्यांकुंजांतरेकृतांशय्यां।
तत्रगत्तेसति[illegible]रीताकथंजाताकीदृशींराधां।रचितरुचिरभूषां।रचितानानाविधारु
चिरामनोहराभूषाययासातां।पुनःकीदृशीं।निरवसादांनिर्गतोअवसादोक्लेशोयस्या

स्तांप्रियाप्राप्तिजक्लेशान्निहतांनिरवसादांरचितरुचिरभूषांज्ञात्वाकृतवेषेकेशवेकुंजश।
य्यांगतवतीसतितत्स्थलीस्थितांराधांज्ञात्वातदाकापिसखीपूर्वोक्तासखीमुकुंदेमनागगमनात्
स्वाकारितप्रियानागमनात्त्वयात्याजितमानात्यजनाच्चसाविरक्ताजातातदातन्ताहृद्रूपःसख्यो
वक्यःसतितन्मध्येकापिपदेनेतिज्ञायते।प्रदोषेकीदृशे।दृष्टिमोषेदृष्टिमुष्णातीतिदृष्टिमुक् उ
तस्मिन्तमसादृष्टिंहरति।एवंविधेप्रदोषेस्फुरतिसतिसातदाराधांजगाद।साकथंजगाद
यतोराधांसर्वासामाराध्यांकथमाराध्यांयतःसंसिद्धिरूपामतःसाजगादेत्यर्थः।किंजगा
दतदाह।।विरचितचाटुवचनरचनमिति।। ।।वसंतरागेणगीयते।। ।।विरचितचाटुवच
नरचनंचरणेरचितप्रणिपातं।संप्रतिमंजुलवंजुलसीमनिकेलिशयनमनुयातं।मुग्धे
मधुमथनमनुगतमनुसरराधिके।। ।।१।। ।।हेमुग्धेहेराधिकेअनुगतंमधुमथनंअनु
सर।अनुगतानुगमनशैथिल्यामुग्धेतिसंबोधनं।मुग्धांप्रतिकथननोचितंतथापि

गीत०गोव०
२०१

प्रबोधिनी·

पूर्वोक्तलक्षणयुक्ताराधिकात्वात्कथ्यंते। राधाएवराधिका। स्वार्थेइक्प्रत्ययः। संसिद्धि
पूरणस्वार्थंकरोतितस्मादाराध्यतेतिराधिकासंबोधनं हे एवंविधे· अनुगतंपासंअ
नु अनुगतंपूर्वंसौपागतस्तदनुत्वंतदनुसर। अभिसारंकुर्वित्यर्थः। कीदृशंअनु
गतं। मधुमथनंमधुदैत्यमथनकर्त्तारं। एवंविधसामर्थ्यवाहरंकारीमायावीरोषणश्च
लः। विकंठनश्चविदग्धिर्धीरोद्धतनदाहृतः। इतितमनुसर। नन्वेवंविधंप्रतिकथमनुस
रामीत्यत्राह। कीदृशंविरचितचाटुवचनंचरणेरचितप्रणिपातमिति। त्वंततोप्यधिका।
एवंविधमपिविरचितानानाविधवदास्येयदिकिंचिदपीत्याद्यारभ्यप्रहश्रौतवमदालसे
त्यादिपर्यंततच्चाटुवचनानांरचनायेनतं। चरणेसप्रेमैकवचनोक्त्याक्रोधवरा।
देकंवचनंमानसमाह। संप्रतीति। संप्रतिइदानींरचितरुचिरकृपालक्षणंतवप्रसादं।
प्रसन्नतांमनसालब्ध्वास्वयमपिकृतवेषः सन्मंजुजातिमनोहरं। वंजुलवानीर

२